Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# आधुनिककाले नागानन्दनाटकस्य उपादेयता

**Aadhunikakale Naganandanatakasya Upadeyata**

**Dr. Ch. Pavan Kumar**
Guest - Faculty of Sanskrit, Dept. of Telugu & Oriental Languages, Acharya Nagarjuna University,
Nagarjuna Nagar, Guntur, Andhra Pradesh

**Abstract**

आधुनिकवैज्ञानिकयुगे मानवाः साङ्केतिक तथा आर्थिकव्यवहारेषु वृद्धिं संप्राप्य नैकविधसुखामग्नाः तिष्ठन्ति । किन्तु तेषां स्वाभाविकलक्षणं मानवत्वं परित्यज्य मृगाः इव व्यवहरन्ति । तत्फलमेव समाजे अनुदिनं गोचरीक्रियमाणाः प्रवर्धमानाः अकृत्याः अधार्मिकाः नीतिबाह्यकार्यकलापाश्च ।

प्रस्तुतसमाजे सर्वे मानवसम्बन्धाः आर्थिकबन्धाः इव परिणमन्ति । यान्त्रिकरूपेण प्रचलितैः स्वार्थनिष्पादनपरैः मनुजैः संभरितमिदं समकालीनसमाजं, प्रेमौदार्यादि मानवीय भावान् विलुप्तास्सन् घोरारण्य सदृशोऽभवत् । अद्यतनसमाजे पुनः मानवीयमूल्यानां संवर्धनाय उत्तमसाहित्यस्य प्रचारः प्रसारश्च नितराम् अपेक्ष्यते ।

साहित्यस्य परमप्रयोजनं समाजहितमेव । एतादृश साहित्ये अन्यतमम् अग्रतमम् अत्युत्तमम् च साहित्यं संस्कृतसाहित्यम् । वैदिकसाहित्यादारभ्य आधुनिककालसाहित्यपर्यन्तं विविधैः कविपुङ्गवैः विरचितैः नैकविध साहित्यप्रक्रियाविशेषैः विश्वकल्याणभावैः संस्कृतसाहित्यं सर्वदा उत्कृष्यते ।

वाल्मीकि-व्यासादिमहर्षिभिः कालिदासादि महाकविभिश्च विरचितानि पुराणेतिहासकाव्य-नाटकादीनि मानवीयांशमूल्यैः राराजन्ते । एते प्राचीनकविमहर्षीणां मार्गमवलम्ब्य अनन्तरकाले अनेके कविपुङ्गवाः तेषां कृतिभिः सुरभारतीं संसेवन्ते । एतेषु कविवरेण्येषु श्रेष्ठः कविः श्रीहर्षः । अनेन महाभागेन विरचित नागानन्दनाटके समुपनिबद्धः विविधाः अमूल्यांशाः आधुनिककाले कथं उपयुज्यन्ते इति विषयः अस्मिन् शोधपत्रे मया यथामति परिशीलितः ।

**मुख्यांशाः (Key words)**

(1) यौवनावस्थादोषाः (2) धर्मबद्धं पालनम् (3) भूतदया (4) परोपकारस्यवैशिष्ट्यम् (5) वैराग्य-भावनायाः औन्नत्यम् (6) स्थितप्रज्ञता (7) अहिंसापरमोधर्मः ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## प्रस्तावनाः

अस्माकं भारतीयसंस्कृतेः निखिलविश्वे महोन्नतं स्थानमस्ति । पुरुषार्थचतुष्टय साधनभूताः विविधाः नैतिकांशाः, मानवीयमूल्यानि भारतीयसंस्कृतेः वैशिष्ट्यं नितरां प्रवर्धन्ते । 'अहिंसा परमो धर्मः' इति वेदेन, 'आत्मवत् सर्वभूतानि' इति भगवद्गीतया, 'परोपकारः पुण्याय, पापाय च परपीडनम्' इति अष्टादशपुराणानां सारश्च विश्वकल्याणमय भावाः उद्घोष्यन्ते ।

दुर्बलानाम्, आर्तानाम्, अकिञ्चनानाम् आलम्बनरूपेण स्थित्वा, तेषां हृदयेषु स्थैर्यं प्रकल्प्य, व्यक्तित्वविकासाय यदुपयुज्यते तदेव मानवीयमूल्यसंवर्धकं साहित्यम्।

अतः बाल्यादारभ्य नीतिकथाः, महतां पुण्यशीलानां साधुपुरुषाणाञ्च दिव्यचरितं यदि उपदिश्यते तर्हि तैः प्रबोधैः संवर्धिताः बालाः भविष्यति काले स्व-परभेदान् परित्यज्य विश्वसौभ्रातृत्वभावैः आदर्शमानवजीवनं यापयितुं सन्नद्धाः भविष्यन्ति ।

वैदिकसाहित्यादारभ्य आधुनिकसाहित्ये विविधनूत्नप्रक्रियायाः पर्यन्तं अनेके महर्षयः, कविपुङ्गवाश्च तेषां कृतिभिः समाजे धार्मिक-आध्यात्मिक-नैतिक-मानवीयमूल्यानां परिरक्षणाय श्रीरामः, श्रीकृष्णः, शिबिः, बलिः, दधीचिः इत्याद्यनेकैः उत्तमादर्शपात्रैः उपदेशं कृत्वा उत्तमसमाजनिर्माणे कटिबद्धाः आसन् । एतादृशं महोन्नतं साहित्यं सृष्टवतां कविवराणाम् अग्रणीः श्रीहर्षदेवः । तेन विरचितं नागानन्दनाटकं च सर्वस्मिन् काले उपादेयताम् उपयाति । नाटकेऽस्मिन् प्रबोधिताः नैकविध धार्मिकनैतिक विषयाः आधुनिककाले कथं ग्राह्रतां बिभर्ति इति विषयमधिकृत्य शोधपत्रमिदं मया विलिखितम् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# आधुनिककाले नागानन्दनाटकस्य उपादेयता

## (1) यौवनावस्थादोषाः

प्रकृतनाटके नायकः युवा जीमूतवाहनः नाटकारम्भे स्वमित्रं विदूषकमुद्दिश्य यौवनावस्थायाः स्थितिः, कुटिलायां यौवनदशायां मनोनिग्रहं कृत्वा, माता-पितृ-पादसेवने तत्समयं यापनम् उत्तममित्युक्त्वा तस्य धार्मिकदृक्पथं प्रदर्शितवान् । यथा -

**"रागस्यास्पदमित्यवैमि न हि मेध्वंसीति न प्रत्ययः**
**कृत्याकृत्यविचारणासु विमुखं को वा न वेत्ति क्षितौ ।**
**एवं निन्द्यमपीदमिन्द्रियवशं प्रीत्यै भवेद् यौवनं**
**भक्त्या याति यदीत्यमेव पितरौ शुश्रूषमाणस्य मे ।।"**[(1)] इति ।

**"तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा ?**
**यत् संवाहयतः सुखं तु चरणौ तातस्य किं राजके ।**
**किं भुक्ते भुवनत्रयेधृतिरसौ भुक्तोज्झिते या गुरोः ?**
**आयासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद्गुणः ।।"**[(2)] इति ।

## (2) धर्मबद्धपालना

विदूषकः पुनः जीमूतवाहनमुद्दिश्य - हे राजन् ! मातापितृसेवनेन सह अन्यदपि ते करणीयं कर्तव्यमस्ति, तदेव राज्यपालनमित्युक्तवान् । तच्छ्रुत्वा जीमूतवाहनः तं प्रत्येवमवमवदत् - 'अहं मदीय कर्तव्यात् न दूरं गतवान् अस्मि । राज्ञः करणीयानि कर्तव्यानि सर्वाणि मया कृतानि । न्याय्यमार्गे जीवनाय प्रजाः नियुञ्ज धार्मिकमार्गात् न विचलितुं तान् प्रति मार्गदर्शनं निर्दिष्टवानस्मि। सकलजनहिताय विविधसमुचितकार्याणि कृत्वा सर्वान् संतृप्तयामि'। इत्येवं धार्मिकपालनस्वरूपं विवृतवान् । यथा -

**"न्याय्ये वर्त्मनि योजिताः प्रकृतयस्सन्तस्सुखं स्थापिता**
**नीतो बन्धुजनस्तथात्मसम्मतं राज्ये च रक्षा कृता ।**
**दत्तो दत्तमनोरथाधिककफलः कल्पद्रुमोऽप्यर्थिने**
**किं कर्तव्यमतः परं कथय वा यत्ते स्थितं चेतसि ।।"**[(3)]

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## (3) भूतदया

जीमूतवाहनस्य सिंहासनमाक्रमितं दुरात्मानां मतङ्गं संहरामि इति कोपाविष्टः सन् कठिनवचनान्युक्तान् मित्रावसोः वचनान्याकर्ण्य परमकारुणिकस्वभावः जीमूतवाहनः स्वमनसि हिंसानिरसनं कृत्वा, सर्वभूतदयाभावं शत्रोरुपर्यपि एवं प्रदर्शितवान् -

**"स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया ।**
**राज्यस्य कृते स कथं प्राणिवधक्रौर्यमनुमन्ये ।।"[4]** इति ।

अत्र -

**"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।।"[5]**

इति गीताकारस्य अमृतसन्देशः स्मृतिपथम् आनीतः ।

## (4) परोपकारस्य वैशिष्ट्यम्

गरुडस्य आहाररूपेण निर्दिष्टं नागबालं संरक्षितुं मनसि निश्चित्य लोके निखिलाः जीवाः तुच्छशरीर रक्षणाय नैकविधानि पापानि कुर्वन्ति । किन्तु परोपकारेण इदं शरीरं धन्यं भवतीति शरीरस्य परमप्रयोजनं निर्दिशति परमदयामूर्तिः जीमूतवाहनः । यथा -

**"सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।**
**शरीरकस्यापि कृते मूढाः पापानि कुर्वते ।।"[6]**

**"आर्तं कण्ठगतप्राणं परित्यक्तं स्वबन्धुभिः ।**
**त्राये नैनं यदि ततः कः शरीरेण मे गुणः ।।"[7]** इति ।

## (5) वैराग्य भावनायाः औन्नत्यम्

लोके सकलप्राणिकोटिः मरणात् बिभ्यति। मूढास्सन् मृत्युः कदा कस्मिनरूपे आसन्नो भवतीति विचिन्त्य विषादग्रस्ताः भवन्ति । किन्तु तत्त्वज्ञाः मरणभयरहिताः सन्तः जीवनस्य यथार्थतत्त्वं ज्ञात्वा स्थिरान्तरङ्गैः जीवनसाफल्याय यतन्ते । जीमूतवाहनोऽपि तादृशः समुन्नते तात्त्विकमार्गे प्रवर्तमानः मृत्योः यथार्थरूपम् एवं प्रकटितवान् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**"क्रोडीकरोति प्रथमं जातं नित्यमनित्यता ।**
**धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ।।"(8)** इति ।

## (6) स्थितप्रज्ञता

मानापमानयोः, सुख-दुःखयोः निम्नोतस्थित्योः समभावेन दृष्ट्वा स्थिरचित्तेन जीवनं यापनीयमिति भगवद्गीतायाः दिव्यसन्देशः । यथा -

**"प्रजहाति यदा कामान् सर्वान्पार्थ ! मनोगतान् ।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।"**
**"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।।"(9)** इति ।

जीमूतवाहनः अपि शङ्खचूडनाम नागबालस्य प्राणान् संरक्षितुं स्वीकृतनिर्णयः, वध्यशिलामुपरि उपविश्य सन्तुष्टान्तरङ्गेन गरुत्मन्तमाहूय स्थितप्रज्ञताम्, अमोघस्थैर्यं च प्रदर्शयमास । यथा -

**"न तथा सुखयति मन्ये मलयवती मलयचन्दनरसार्द्रा ।**
**अभिवाञ्छितार्थसिद्ध्यै वध्यशिलेयं यथा स्पृष्टा ।।"**
**"शयितेन मातुरङ्के विश्रब्धं शैशवे न तत्प्राप्तम् ।**
**लब्धं सुखं मयाऽस्या वध्यशिलाया यदुत्सङ्गे ।"(10)** इति ।

## (7) अहिंसापरमोधर्मः

मानवजीवने अहिंसामार्गः एव समुन्नतः । क्रोधद्वेषादि समस्त दुर्गुणान् परित्यज्य समस्त- प्राणिकोटि संरक्षणाय यः अहिंसामार्गे प्रवर्तते, तस्य पूर्वकृतानि दुरितानि सर्वाणि विनश्यन्ति । स एव विषयः जीमूतवाहनेन आदौ प्रकटितः । अनन्तरं हिंसामार्गमवलम्ब्य पन्नगानां मृत्युकारणभूतस्सन् तदनन्तरं पश्चात्तापेन दग्धम् गरुडमुद्दिश्य अहिंसायाः औन्नत्यम् एवं प्रकटितवान् ।

**"नित्यं प्राणाभिघातात् प्रतिविरम कुरु प्राक्कृते चानुतापं**
**यत्नात्पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वेष्वभीतिम् ।**
**मग्नं येनात्र नैनः फलति परिमितप्राणि हिंसात्तमेतत्**
**दुर्गाधापारवारेर्लवणपलमिव क्षिप्तमन्तह्रदस्य ।।"(11)** इति ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## उपसंहारः

श्रीहर्षमहाकविना प्रणीते नागानन्दनाटके समुपनिबद्धाः नैकविधाः मानवीयांशाः सार्वकालिकाः - सार्वत्रिकाः - सार्वजनीनाः इति वक्तुं नैव सन्देहलवः । तान् महोन्नतांशान् आधुनिककाले यदि अनुसरति तर्हि समस्तविश्वः राग - द्वेष - काम - क्रोधादि दुर्लक्षणरहितया विश्वजनीनभावैः विराजते । निखिलसृष्टिः शान्ति सौभाग्यैः संवर्धते ।

------------- 00 --------------

## सन्दर्भ - सङ्केताः

1. द्रः श्रीहर्षदेवः - नागानन्दम् - I / श्लोः 6
2. द्रः श्रीहर्षदेवः - नागानन्दम् - I / श्लोः 7
3. द्रः श्रीहर्षदेवः - नागानन्दम् - I / श्लोः 8
4. द्रः श्रीहर्षदेवः - नागानन्दम् - II / श्लोः 17
5. द्रः वेदव्यासमहर्षिः - श्रीमद्भगवद्गीता - भक्तियोगः / श्लोः 13
6. द्रः श्रीहर्षदेवः - नागानन्दम् - I / श्लोः 7
7. द्रः श्रीहर्षदेवः - नागानन्दम् - IV / श्लोः 11
8. द्रः श्रीहर्षदेवः - नागानन्दम् - IV / श्लोः 8
9. द्रः वेदव्यासमहर्षिः - श्रीमद्भगवद्गीता - सांख्ययोगः / श्लोः 55, 56
10. द्रः श्रीहर्षदेवः - नागानन्दम् - IV / श्लोः 23, 24
11. द्रः श्रीहर्षदेवः - नागानन्दम् - V / श्लोः 25

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:10(3), October, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## उपयुक्तग्रन्थसूची


| | | | |
|---|---|---|---|
| 1. | श्रीहर्षदेवः | नागानन्दनाटकम् कल्याणी संस्कृत - हिन्दी व्याख्योपेतम् व्याख्याकारः पण्डित रामनाथत्रिपाठी शास्त्री | चौखम्बा कृष्णदास् अकादमी, वाराणसी । |
| 2. | वेदव्यासमहर्षिः | श्रीमद्भगवद्गीता | रोहिणी पब्लिकेषन्स्, राजमंड्रि, आन्ध्रप्रदेश् । |